Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 23

P–95–Sanskritam - II

No. of Printed Pages – 7

# प्रवेशिका परीक्षा, 2023

# PRAVESHIKA EXAMINATION, 2023

## संस्कृतम्

## (द्वितीय– प्रश्नपत्रम्)

समय : 3:15 सपादहोरात्रयम्

पूर्णांक : 80

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

**परीक्षार्थिभ्यः सामान्य–निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः।

2) सर्वे प्रश्नाः अनिवार्याः।

3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव लेख्यम्।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम्।

## खण्ड – अ

**1)** वस्तुनिष्ठ प्रश्ना: **[12 × 1 = 12]**

i) कः कस्मिन्नपि काले न जायते? **[1]**

अ) देवः ब) नरः

स) रामः द) आत्मा

ii) सर्वे गुणाः किम् आश्रयन्ते – **[1]**

अ) सम्मानम् ब) काञ्चनम्

स) बलम् द) पुण्यकर्मम्

iii) नरेन्द्रदेवः शिष्यत्वं गृह्णाति – **[1]**

अ) रामकृष्णपरमहंसस्य ब) स्वामिनः विवेकानन्दस्य

स) स्वामिनः दयानन्दस्य द) स्वामिनः अखण्डानन्दस्य

iv) वरतन्तुशिष्यः कः? **[1]**

अ) रघुः ब) अजः

स) कौत्सः द) रामः

v) कैकेयी कस्य राज्याभिषेकम् इच्छति? **[1]**

अ) रामस्य ब) लक्ष्मणस्य

स) भरतस्य द) शत्रुघ्नस्य

vi) कम्बुग्रीवो नाम कच्छपः निवसति – **[1]**

अ) वने ब) जलाशये

स) नगरे द) ग्रामे

vii) जर्जरवंशेन भिक्षापात्रं ताडयति स्म – **[1]**

अ) हिरण्यकः ब) मूषकः

स) कम्बुग्रीवः द) ताम्रचूडः

viii) स्वर्णहंस–स्वर्णपक्षिराजकथायां नृपस्य कथा प्रस्तुताऽस्ति – [1]

अ) चित्ररथस्य　　ब) देवदत्तस्य

स) देवव्रतस्य　　द) ताम्रचूडस्य

ix) सिंहेन स्वगृहमागच्छता कः प्राप्तः? [1]

अ) मूषकः　　ब) श्रृगालसुतः

स) गजसुतः　　द) सिंहशिशुः

x) एकबुद्धिः आसीत् – [1]

अ) मूषकः　　ब) मत्स्यः

स) मण्डूकः　　द) धीवरः

xi) 'लता'–शब्दस्य तृतीयाविभक्ति–द्विवचनस्य रूपमस्ति – [1]

अ) लते　　ब) लताभ्याम्

स) लतयोः　　द) लताभिः

xii) 'दा'–धातोः लट्लकार–प्रथमपुरूष–बहुवचनस्य रूपमस्ति – [1]

अ) ददन्ति　　ब) ददतु

स) ददाति　　द) ददति

**2)** रिक्तस्थानानि पूरयत – **[6×1=6]**

i) नैनं छिन्दन्ति ................. नैनं दहति पावकः। [1]

ii) आलस्यं हि ............... शरीरस्थो महारिपुः। [1]

iii) पुरा देवासुरे ................ पिता ते मम राघव। [1]

iv) ननमयययुतेयं ................ भोगिलोकैः। [1]

v) अनुप्रासः शब्दसाम्यं वैषम्येऽपि .................. यत्। [1]

vi) सर्वज्ञः सुगतो ................... धर्मराजस्तथागतः। [1]

**3)** **अतिलघूत्तरात्मक प्रश्ना:** **[12×1= 12]**

i) नरकस्य द्वारं कतिविधम्? [1]

ii) पाणि: केन विभाति? [1]

iii) कैकेयी नृपं कति वरम् अयाचत? [1]

iv) अस्मिन् लोके क: जीव: श्लाघ्यतम:? [1]

v) गुरूदक्षिणायां महर्षि: वरतन्तु: कियद् धनमानेतुम् आदिष्टवान्? [1]

vi) कूर्म: नाम किमासीत्? [1]

vii) परिव्राजक: कस्यभयात् सिद्धमन्त्रं नागदन्ते अवलम्बितम्? [1]

viii) विमले जले क: क्रीडति? [1]

ix) स्वर्णहंस–स्वर्णपक्षिराजकथानुसारं वृहत्पक्षी कस्य शरणं गत:। [1]

x) प्राणत्यागेऽपि उपस्थिते किं नैव कर्त्तव्यम्? [1]

xi) ''अस्मद्''– शब्दस्य चतुर्थी–विभक्ति–एकवचनरूपं लिखत। [1]

xii) ''प्रच्छ्'' – धातो: लोट्लकारस्य प्रथमपुरूष–बहुवचनरूपं लिखत। [1]

## <u>खण्ड – ब</u>

**4)** सात्विक–आहारस्य स्वरूपं लिखत। **[2]**

**5)** ''राम: कतिवर्षाणि दण्डकारण्ये निवसेत्'' इति कैकेयी इच्छति? **[2]**

**6)** सिंहशिशुश्रृगालपुत्रकथानुसारं गृहं प्रति क: प्रधावित:? **[2]**

7) शतबुद्ध्यादिमत्स्यकथानुसारं मत्स्ययो:नाम्नी लिखत। [2]

8) पद्मसरोवरे कीदृशा: हंसा: तिष्ठन्ति स्म? [2]

9) वसन्ततिलका–छन्दस: लक्षणं लिखत। [2]

10) मन्दाक्रान्ता–छन्दस: उदाहरणं लिखत। [2]

11) यमकालंकारस्य लक्षणं लिखत। [2]

12) ''नमन्तमपि धीमन्तं न लंघयति कश्चन।'' इत्यत्र क: अलंकार:? [2]

13) अमरकोशानुसारं देवस्य नामद्वयं लिखत। [2]

14) अमरकोशानुसारं लक्ष्म्या: नामद्वयं लिखत। [2]

15) ''बालक''– शब्दस्य चतुर्थी–विभक्ते: रूपाणि लिखत। [2]

16) ''कृ''–धातो: लृट्–लकार–उत्तमपुरूषस्य रूपाणि लिखत। [2]

## खण्ड – स

17) अधोलिखितयो: श्लोकयो: एकस्य सप्रसंगं व्याख्या कार्या – [1+2=3]

(क) वासांसि जीर्णानि यथा विहाय,
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा –
न्यन्यानि संयाति नवानि देही।।

(ख) एवमस्तु गमिष्यामि वनं वस्तुमहंत्वित:।
जटाचीर धरो राज्ञ: प्रतिज्ञामनुपालयन्।।

18) अधोलिखितयो: श्लोकयो: एकस्य सप्रसंगं व्याख्या लेखनीया – [1+2=3]

(क) कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विन:।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा।।

(ख) इत्थं द्विजेन द्विजराजकान्ति –
रावेदितो वेदविदां वरेण।
एनोनिवृत्तेन्द्रियवृत्तिरेनं
जगाद भूयो जगदेकनाथ:।।

19) अधोलिखितयो: श्लोकयो: एकस्य सप्रसङ्गं भावार्थ: लेख्य:। [1+2=3]

(क) कट्वम्ललवणात्युष्ण तीक्ष्णरूक्षविदाहिन:।
आहारा राजसस्येष्टा दु:खशोकामयप्रदा:।।

(ख) आरम्भगुर्वी क्षयिणी क्रमेण,
लघ्वी पुरा वृद्धिमुपैति पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना,
छायेव मैत्री खलसज्जनानाम्।।

20) भवान् नगेन्द्र:, राजकीय–प्रवेशिका–संस्कृत–विद्यालय:, शान्तिनगरस्य छात्र: भ्रमणगमनार्थं दिनत्रयस्य अवकाशाय प्रधानाध्यापकाय प्रार्थनापत्रं लिखतु। [3]

अथवा

भवत: नगरस्य समुचितविकाशाय नगरपालिका–अध्यक्षाय पत्रं लिखतु।

## खण्ड – द

**21)** अधोलिखितगद्ययो: कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या – **[1+3=4]**

(क) भो मित्र! जम्बालशेषमेतत्सर: सञ्जातं, तत्कथं भवान् भविष्यतीति व्याकुलत्वं नो हृदि वर्तते। तच्छ्रुत्वा कम्बुग्रीव आह–भो! साम्प्रतं नाऽस्त्यस्माकं जीवितव्यं, जलाभावात्।

(ख) ततो राजा भृत्यानब्रवीत्–'भो भो! गच्छत। सर्वान् पक्षिण: गतासून् कृत्वा शीघ्रमानयत।' राजादेशानन्तरमेव प्रचेलुस्ते। अथ लगुडहस्तान्राजपुरूषान् दृष्ट्वा उक्तम्।

**22)** एकस्या: कथाया: सारांश: संस्कृतभाषायां लेखनीय:। **[4]**

(क) हिरण्यकताम्रचूडकथा

(ख) सिंहशिशुश्रृगालपुत्रकथा

**23)** कमप्येकं विषयमवलम्ब्य निबन्धं लिखत। **[4]**

(क) मम प्रिय: कवि:

(ख) संस्कृतदिवस:

(ग) महाराणाप्रताप:

☯☯☯☯

DO NOT WRITE ANYTHING HERE